तर्णितुम्, तर्णयितुम्, तितर्णिषितुम्, तरीतृणितुम्;
[1]तृतिः, [2]तृण्टिः, तर्णना, तितर्णिषा, तरीतृणा;
तर्णनम्, तर्णनम्, तितर्णिषणम्, तरीतृणनम्;
[3]तृर्णित्वा-तृत्वा, तर्णयित्वा, तितर्णिषित्वा, तरीतृणित्वा;
[4]प्रतृत्य-प्रतृण्य, प्रतर्ण्य, प्रतितर्णिष्य, प्रतरीतृण्य;
तर्णम् २, तर्णित्वा २-तृत्वा २, } तर्णम् २, तर्णयित्वा २, } तितर्णिषम् २, तितर्णिषित्वा २, } तरीतृणम् २; तरीतृणित्वा २. }

## (767) "उ तृदिर् हिंसानादरयोः"

(VII रुधादिः-1446. सक. सेट्. उभ.)

तर्दकः-र्दिका, तर्दकः-र्दिका, [5]तितर्दिषकः-षिका-[6]तितृत्सकः-त्सिका, [7]तरीतृदकः-दिका;
तर्दिता-त्री, तर्दयिता-त्री, तितर्दिषिता-तितृत्सिता-त्री, तरीतृदिता-त्री;

---

1. क्तिनि, 'अनुदात्तोपदेशवनतितनोत्यादीनाम्—' (6-4-37) इत्यनुनासिकलोपे रूपम्।
2. क्तिचि तु, 'न क्तिचि दीर्घश्च' (6-4-39) इति सूत्रेण दीर्घस्य, अनुनासिकलोपस्य च निषेधः। 'ष्टुना ष्टुः' (8-4-41) इति तकारस्य ष्टुत्वेन टकारः। 'ऋवर्णान्नस्य णत्वं वाच्यम्' (वा. 8-4-1) इति वचनादत्र धातौ तृणु इत्यत्र णत्वं भवति, नकारान्तत्वमेवास्यौपदेशिकम्—इति केचित्। तेषां पक्षे तु, तृन्तिः इति रूपं भवति।
3. 'उदितो वा' (7-2-56) इति क्त्वायामिड्विकल्पः। इट्पक्षे, 'न क्त्वा सेट्' (1-2-18) इति कित्वनिषेधात् गुणे तर्णित्वा इति रूपम्। इडभावपक्षे, अनुनासिकलोपे गुणाभावः।
4. 'वा ल्यपि' (6-4-38) इति अनुनासिकलोपविकल्पः। लोपपक्षे तुकि प्रतृत्य इति रूपम्।
5. 'सेऽसिचि कृतचृतछृदतृदनृतः' (7-2-57) इति सादेरार्धधातुकस्य इड्विकल्पः। इट्पक्षे सर्वत्र एवं रूपं ज्ञेयम्।
6. इडभावपक्षे, 'इको झल्' (1-2-9) इति सनः कित्वादङ्गस्य न गुणः। 'खरि च' (8-4-55) इति दकारस्य चर्त्वेन तकारः। एवम् इडभावपक्षे सर्वत्र ज्ञेयम्।
7. यङन्ते 'रीगृदुपधस्य च' (7-4-90) इति रीगागमः। एवं सर्वत्र ज्ञेयम्।